# AkShamalika Upanishad

# અક્ષમાલિકોપનિષત્

## Document Information

Text title : Akshamalika Upanishad

File name : akshamalika.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic Tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 67 / 108;

Latest update : Mar. 22, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

April 1, 2025

*sanskritdocuments.org*

AkShamalika Upanishad

# અક્ષમાલિકોપનિષત્

અકારાદિક્ષકારાન્તવર્ણજાતકલેવરમ્ ।
વિકલેવરકૈવલ્યં રામચન્દ્રપદં ભજે ॥

ૐ વાઙ્મે મનસિ પ્રતિષ્ઠિતા મનો મે વાચિ
પ્રતિષ્ઠિતમાવિરાવીર્મ એધિ ॥ વેદસ્ય મ આણીસ્થઃ
શ્રુતં મે મા પ્રહાસીરનેનાધીતેનારાત્રા-
ન્સન્દધામ્યૃતં વદિષ્યામિ સત્યં વદિષ્યામિ ॥

તન્મામવતુ તદ્વક્તારમવતુ અવતુ મામવતુ
વક્તારમવતુ વક્તારમ્ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ । અથ પ્રજાપતિર્ગુહં પપ્રચ્છ ભો
બ્રહ્મન્નક્ષમાલાભેદવિધિં બ્રૂહીતિ । સા કિં
લક્ષણા કતિ ભેદા અસ્યાઃ કતિ સૂત્રાણિ કથં
ઘટનાપ્રકારઃ કે વર્ણાઃ કા પ્રતિષ્ઠા
કૈષાધિદેવતા કિં ફલં ચેતિ । તં ગુહઃ
પ્રત્યુવાચ પ્રવાલમૌક્તિકસ્ફટિકશઙ્ખ-
રજતાષ્ટાપદચન્દનપુત્રજીવિકાબ્જે રુદ્રાક્ષા
ઇતિ । આદિક્ષાન્તમૂર્તિઃ સાવધાનભાવા ।
સૌવર્ણં રાજતં તામ્રં તન્મુખે મુખં
તત્પુચ્છે પુચ્છં તદન્તરાવર્તનક્રમેણ
યોજયેત્ । યદસ્યાન્તરં સૂત્રં તદ્બ્રહ્મ ।
યદ્દક્ષપાર્શ્વે તચ્છૈવમ્ । યદ્વામે
તદ્વૈષ્ણવમ્ । યન્મુખં સા સરસ્વતી ।
યત્પુચ્છં સા ગાયત્રી । યત્સુષિરં સા
વિદ્યા । યા ગ્રન્થિઃ સા પ્રકૃતિઃ । યે સ્વરાસ્તે

ધવલાઃ । યે સ્પર્શાસ્તે પીતાઃ । યે પરાસ્તે
રક્તાઃ । અથ તાં પઞ્ચભિર્ગન્ધૈરમૃતૈઃ
પઞ્ચભિર્ગવ્યૈસ્તનુભિઃ શોધયિત્વા
પઞ્ચભિર્ગવ્યૈર્ગન્ધોદકેન સંસ્નાપ્ય
તસ્માત્સોઙ્કારેણ પત્રકૂર્ચેન સ્નપયિત્વા-
ષ્ટભિર્ગન્ધૈરાલિપ્ય સુમનઃસ્થલે
નિવેશ્યાક્ષતપુષ્પૈરારાધ્ય પ્રત્યક્ષ-
માદિક્ષાન્તૈર્વર્ણૈર્ભાવયેત્ । ઓમઙ્કાર
મૃત્યુઞ્જય સર્વવ્યાપક પ્રથમેઽક્ષે પ્રતિતિષ્ઠ ।
ઓમાઙ્કારાકર્ષણાત્મકસર્વગત દ્વિતીયેઽક્ષે પ્રતિતિષ્ઠ ।
ઓમિઙ્કારપુષ્ટિદાક્ષોભકર તૃતીયેઽક્ષે પ્રતિતિષ્ઠ ।
ઓમીઙ્કાર વાક્પ્રસાદકર નિર્મલ ચતુર્થેઽક્ષે પ્રતિતિષ્ઠ ।
ઓમુઙ્કાર સર્વબલપ્રદ સારતર પઞ્ચમેઽક્ષે પ્રતિતિષ્ઠ ।
ઓમૂઙ્કારોચ્ચાટન દુઃસહ ષષ્ઠેઽક્ષે પ્રતિતિષ્ઠ ।
ઓમૃઙ્કાકાર સંક્ષોભકર ચઞ્ચલ સપ્તમેઽક્ષે પ્રતિતિષ્ઠ ।
ઓમૄઙ્કાર સંમોહનકરોજ્વલાષ્ટમેઽક્ષે પ્રતિતિષ્ઠ ।
ઓમ્લૃઙ્કારવિદ્વેષણકર મોહક નવમેઽક્ષે પ્રતિતિષ્ઠ ।
ઓમ્લૄઙ્કાર મોહકર દશમેઽક્ષે પ્રતિતિષ્ઠ ।
ઓમેઙ્કાર સર્વવશ્યકર શુદ્ધસત્ત્વૈકાદશેઽક્ષે પ્રતિતિષ્ઠ ।
ઓમૈઙ્કાર શુદ્ધસાત્ત્વિક પુરુષવશ્યકર દ્વાદશેઽક્ષે પ્રતિતિષ્ઠ ।
ઓમોઙ્કારાખિલવાઙ્મય નિત્યશુદ્ધ ત્રયોદશેઽક્ષે પ્રતિતિષ્ઠ ।
ઓમૌઙ્કાર સર્વવાઙ્મય વશ્યકર ચતુર્દશેઽક્ષે પ્રતિતિષ્ઠ ।
ઓમઙ્કાર ગજાદિવશ્યકર મોહન પઞ્ચદશેઽક્ષે પ્રતિતિષ્ઠ ।
ઓમઃકાર મૃત્યુનાશનકર રૌદ્ર ષોડશેઽક્ષે પ્રતિતિષ્ઠ ।
ૐ કઙ્કાર સર્વવિષહર કલ્યાણદ સપ્તદશેઽક્ષે પ્રતિતિષ્ઠ ।
ૐ ખઙ્કાર સર્વક્ષોભકર વ્યાપકાષ્ટાદશેઽક્ષે પ્રતિતિષ્ઠ ।
ૐ ગઙ્કાર સર્વવિઘ્નશમન મહત્તરૈકોનવિંશેઽક્ષે પ્રતિતિષ્ઠ ।
ૐ ઘઙ્કાર સૌભાગ્યદ સ્તમ્ભનકર વિંશેઽક્ષે પ્રતિતિષ્ઠ ।
ૐ ઙકાર સર્વવિષનાશકરોગ્રૈકવિંશેઽક્ષે પ્રતિતિષ્ઠ ।
ૐ ચઙ્કારાભિચારઘ્ન ક્રૂર દ્વાવિંશેઽક્ષે પ્રતિતિષ્ઠ ।
ૐ છઙ્કાર ભૂતનાશકર ભીષણ ત્રયોવિંશેઽક્ષે પ્રતિતિષ્ઠ ।
ૐ જઙ્કાર કૃત્યાદિનાશકર દુર્ધર્ષ ચતુર્વિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ ઝઙ્કાર ભૂતનાશકર પઞ્ચવિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ ઞકાર મૃત્યુપ્રમથન ષડ્વિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ ટઙ્કાર સર્વવ્યાધિહર સુભગ સપ્તવિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ ઠઙ્કાર ચન્દ્રરૂપાષ્ટાવિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ ડઙ્કાર ગરુડાત્મક વિષઘ્ન શોભનૈકોનત્રિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ ઢઙ્કાર સર્વસમ્પત્પ્રદ સુભગ ત્રિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ ણઙ્કાર સર્વસિદ્ધિપ્રદ મોહકરૈકત્રિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ તઙ્કાર ધનધાન્યાદિસમ્પત્પ્રદ પ્રસન્ન દ્વાત્રિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ થઙ્કાર ધર્મપ્રાપ્તિકર નિર્મલ ત્રયસ્ત્રિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ દઙ્કાર પુષ્ટિવૃદ્ધિકર પ્રિયદર્શન ચતુસ્ત્રિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ ધઙ્કાર વિષજ્વરનિઘ્ન વિપુલ પઞ્ચત્રિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ નઙ્કાર ભુક્તિમુક્તિપ્રદ શાન્ત ષટ્ત્રિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ પઙ્કાર વિષવિઘ્નનાશન ભવ્ય સપ્તત્રિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ ફઙ્કારાણિમાદિસિદ્ધિપ્રદ જ્યોતીરૂપાષ્ટત્રિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ બઙ્કાર સર્વદોષહર શોભનૈકોનચત્વારિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ ભઙ્કાર ભૂતપ્રશાન્તિકર ભયાનક ચત્વારિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ મઙ્કાર વિદ્વેષિમોહનકરૈકચત્વારિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ યઙ્કાર સર્વવ્યાપક પાવન દ્વિચત્વારિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ રઙ્કાર દાહકર વિકૃત ત્રિચત્વારિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ લઙ્કાર વિશ્વંભર ભાસુર ચતુશ્ચત્વારિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ વઙ્કાર સર્વાપ્યાયનકર નિર્મલ પઞ્ચચત્વારિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ શઙ્કાર સર્વફલપ્રદ પવિત્ર ષટ્ચત્વારિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ ષઙ્કાર ધર્માર્થકામદ ધવલ સપ્તચત્વારિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ સઙ્કાર સર્વકારણ સાર્વવર્ણિકાષ્ટચત્વારિંશેઽક્ષે પ્રતિતિષ્ઠ ।

ૐ હઙ્કાર સર્વવાઙ્મય નિર્મલૈકોનપઞ્ચાશદક્ષે પ્રતિતિષ્ઠ ।

ૐ ળઙ્કાર સર્વશક્તિપ્રદ પ્રધાન પઞ્ચાશદક્ષે પ્રતિતિષ્ઠ ।

ૐ ક્ષઙ્કાર પરાપરતત્ત્વજ્ઞાપક પરંજ્યોતીરૂપ શિખામણૌ પ્રતિતિષ્ઠ ।

અથોવાચ યે દેવાઃ પૃથિવીપદસ્તેભ્યો નમો

ભગવન્તોઽનુમદન્તુ શોભાયૈ પિતરોઽનુમદન્તુ

શોભાયૈ જ્ઞાનમયીમક્ષમાલિકામ્ ।

અથોવાચ યે દેવા અન્તરિક્ષસદસ્તેભ્યઃ ૐ નમો

ભગવન્તોઽનુમદન્તુ શોભાયૈ પિતરોઽનુમદન્તુ

શોભાયૈજ્ઞાનમયીમક્ષમાલિકામ્ ।
અથોવાચ યે દેવા દિવિષદસ્તેભ્યો નમો
ભગવન્તોઽનુમદન્તુ શોભાયૈ પિતરોઽનુમદન્તુ
શોભાયૈ જ્ઞાનમયીમક્ષમાલિકામ્ ।
અથોવાચ યે મન્ત્રા યા વિદ્યાસ્તેભ્યો
નમસ્તાભ્યશ્ચોન્નમસ્તચ્છક્તિરસ્યાઃ
પ્રતિષ્ઠાપયતિ ।
અથોવાચ યે બ્રહ્મવિષ્ણુરુદ્રાસ્તેભ્યઃ
સગુણેભ્ય ૐ નમસ્તદ્વીર્યમસ્યાઃ
પ્રતિષ્ઠાપયતિ ।
અથોવાચ યે સાઙ્ખ્યાદિતત્ત્વભેદાસ્તેભ્યો
નમો વર્તધ્વં વિરોધેઽનુવર્તધ્વમ્ ।
અથોવાચ યે શૈવા વૈષ્ણવાઃ શાક્તાઃ
શતસહસ્રશસ્તેભ્યો નમોનમો ભગવન્તોઽ-
નુમદન્ત્વનુગૃહ્ણન્તુ ।
અથોવાચ યાશ્ચ મૃત્યોઃ પ્રાણવત્યસ્તાભ્યો
નમોનમસ્તેનૈતં મૃડયત મૃડયત ।
પુનરેતસ્યાં સર્વાત્મકત્વં ભાવયિત્વા ભાવેન
પૂર્વમાલિકામુત્પાદ્યારભ્ય તન્મયીં
મહોપહારૈરુપહૃત્ય આદિક્ષાન્તૈરક્ષરૈરક્ષ-
માલામષ્ટોત્તરશતં સ્પૃશેત્ ।
અથ પુનરુત્થાપ્ય પ્રદક્ષિણીકૃત્યોં નમસ્તે
ભગવતિ મન્ત્રમાતૃકેઽક્ષમાલે
સર્વવશઙ્કર્યોંનમસ્તે ભગવતિ મન્ત્રમાતૃકેઽ-
ક્ષમાલિકે શેષસ્તમ્ભિન્યોંનમસ્તે ભગવતિ
મન્ત્રમાતૃકેઽક્ષમાલે ઉચ્ચાટન્યોંનમસ્તે
ભગવતિ મન્ત્રમાતૃકેઽક્ષમાલે વિશ્વામૃત્યો
મૃત્યુઞ્જયસ્વરૂપિણિ સકલલોકોદ્દીપિનિ સકલલોક-
રક્ષાધિકે સકલલોકોજ્જીવિકે સકલલોકોત્પાદિકે
દિવાપ્રવર્તિકે રાત્રિપ્રવર્તિકે નદ્યન્તરં યાસિ
દેશાન્તરં યાસિ દ્વીપાન્તરં યાસિ લોકાન્તરં
યાસિ સર્વદા સ્ફુરસિ સર્વહૃદિ વાસસિ ।

નમસ્તે પરારૂપે નમસ્તે પશ્યન્તીરૂપે નમસ્તે
મધ્યમારૂપે નમસ્તે વૈખરીરૂપે સર્વતત્ત્વાત્મિકે
સર્વવિદ્યાત્મિકે સર્વશક્ત્યાત્મિકે સર્વદેવાત્મિકે
વસિષ્ઠેન મુનિનારાધિતે વિશ્વામિત્રેણ
મુનિનોપજીવ્યમાને નમસ્તે નમસ્તે ।
પ્રાતરધીયાનો રાત્રિકૃતં પાપં નાશયતિ ।
સાયમધીયાનો દિવસકૃતં પાપં નાશયતિ ।
તત્સાયંપ્રાતઃ પ્રયુઞ્જાનઃ પાપોઽપાપોભવતિ ।
એવમક્ષમાલિકયા જપ્તો મન્ત્રઃ સદ્યઃ સિદ્ધિકરો
ભવતીત્યાહ ભગવાન્ગુહઃ પ્રજાપતિમિત્યુપનિઅષત્ ॥

ૐ વાઙ્ મે મનસિ પ્રતિષ્ઠિતા મનો મે વાચિ
પ્રતિષ્ઠિતમાવિરાવીર્મ એધિ ॥ વેદસ્ય મ આણીસ્થઃ
શ્રુતં મે મા પ્રહાસીરનેનાધીતેનાહોરાત્રા-
ન્સન્દધામ્યૃતં વદિષ્યામિ સત્યં વદિષ્યામિ ।
તન્મામવતુ તદ્વક્તારમવતુ અવતુ મામવતુ
વક્તારમવતુ વક્તારમ્ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ હરિઃ ૐ તત્સત્ ॥

ઇત્યક્ષમાલિકોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

---

*AkShamalika Upanishad*

pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*